# Pitrisuktam

# पितृसूक्तम्

## Document Information

Text title : pitRisUktam Rigveda saMhitA

File name : pitRisUktam.itx

Category : veda, svara, sUkta

Location : doc_veda

Description-comments : RigvedIya 10.15.1-14

Source : https://sanskritdocuments.org/mirrors/rigveda/e-text.htm

Latest update : September 22, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 22, 2024

*sanskritdocuments.org*

# पितृसूक्तम्

ऋग्वेदान्तर्गतम् पञ्चदशसूक्तम्
((१-१४) चतुर्दशर्चस्य सूक्तस्य यामायनः शत ऋषिः । पितरो देवताः ।
(१-१०, १२-१४) प्रथमादिदशर्चाम् द्वादश्यादितृचस्य च त्रिष्टुप्,
(११) एकादश्याश्च जगती छन्दसी ॥)

ऋषिः - शङ्खो यामायनः । देवता - पितरः ।
छन्दः - १,२,७,१२,१३,१४ विराड्त्रिष्टुप्; ३,९,१० त्रिष्टुप्; ४,८ पादनिचृत्त्रिष्टुप्;
५ आर्चीभुरिक्त्रिष्टुप्, ६ निचृत्त्रिष्टुप्; ११ निचृज्जगती ।
स्वरः - १-१०, १२-१४ धवतः; ११ निषादः

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ १०.०१५.०१

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥ १०.०१५.०२

आहं पितॄन्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ १०.०१५.०३

बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाथा नः शं योररपो दधात ॥ १०.०१५.०४

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ १०.०१५.०५

आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥ १०.०१५.०६

आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।

पु॒त्रेभ्य॑ः पितर॒स्तस्य॒ वस्व॒ः प्र य॑च्छत॒ त इ॒होर्ज᳚ं दधात ॥ १०.०१५.०७
ये न॒ः पूर्वे᳚ पि॒तर॑ः सो॒म्यासो᳚ऽनूहि॒रे सो᳚मपी॒थं वसि॑ष्ठाः ।
तेभि᳚र्य॒मः सं᳚ररा॒णो ह॒वींष्यु॒शन्नु॒शद्भि॑ः प्रतिका॒मम॑त्तु ॥ १०.०१५.०८
ये ता᳚तृ॒षुर्दे᳚व॒त्रा जेह॑माना होत्रा॒विद॒ः स्तोम॑तष्टासो अ॒र्कैः ।
आग्ने᳚ याहि सुवि॒दत्रे᳚भिर॒र्वाङ्स॒त्यैः क॒व्यैः पि॒तृभि॑र्घर्म॒सद्भि॑ः ॥ १०.०१५.०९
ये स॒त्यासो᳚ हवि॒रदो᳚ हवि॒ष्पा इन्द्रे᳚ण दे॒वैः स॒रथ॒ं दधा᳚नाः ।
आग्ने᳚ याहि स॒हस्र᳚ं देव॒वन्दैः परै॒ः पूर्वै᳚ः पि॒तृभि॑र्घर्म॒सद्भि॑ः ॥ १०.०१५.१०
अग्नि॑ष्वात्ताः पितर॒ एह ग॑च्छत॒ सद॑ःसदः सदत सु॒प्रणीतयः ।
अ॒त्ता ह॒वींषि॒ प्रय॑तानि ब॒र्हिष्यथा᳚ र॒यिं सर्व॑वीरं दधातन ॥ १०.०१५.११
त्वम॑ग्न ईळि॒तो जा᳚तवे॒दोऽवा᳚ड्ढ॒व्यानि॑ सु॒रभीणि॑ कृ॒त्वी ।
प्रादा᳚ः पि॒तृभ्य॑ः स्व॒धया॒ ते अ॑क्षन्न॒द्धि त्वं दे᳚व॒ प्रय॑ता ह॒वींषि॑ ॥ १०.०१५.१२
ये चे॒ह पि॒तरो॒ ये च॒ नेह याँश्च॑ वि॒द्म याँ उ॑ च॒ न प्र॑वि॒द्म ।
त्वं वे᳚त्थ॒ यति॒ ते जा᳚तवेदः स्व॒धाभि᳚र्य॒ज्ञं सु॒कृ॑तं जुषस्व ॥ १०.०१५.१३
ये अ॑ग्नि॒दग्धा ये अन॑ग्निदग्धा॒ मध्ये᳚ दि॒वः स्व॒धया᳚ मा॒दय᳚न्ते ।
तेभि॑ः स्व॒राळसु॑नीतिमे॒तां य॑थाव॒शं त॒न्व᳚ं कल्पयस्व ॥ १०.०१५.१४